नलथा

१ श्रीमते रामानुजाय नमः॥ आचार्यहृदयं अस्मद्गुरुभ्यो नमः॥ अस्मत्परमगुरुभ्यो
नमः॥ अस्मत्सर्वगुरुभ्यो नमः॥ श्रीमदादिशठकोपस्वामिने नमः॥ श्रीमते वेदान्तमहागुरु
वे नमः॥ श्रीमते रामानुजाय नमः॥ श्रीमते परांकुशदासाय नमः॥ श्रीमते पूर्णमिश्राय नमः॥ श्रीमद्या
मुनमुनये नमः॥ श्रीमते राममिश्राय नमः॥ श्रीमते पुंडरीकाक्षाय नमः॥ श्रीमन्नाथमुनये नमः॥
श्रीमते शठकोपाय नमः॥ श्रीमते विष्वक्सेनाय नमः॥ श्रीयै नमः॥ श्रीधराय नमः॥ श्लोक॥ अस्मद्देशि
कमस्मदीयपरमाचार्यानशेषान् गुरून् श्रीमल्लक्ष्मणयोगिपुंगवमहापूर्णौ मुनिं यामुनं॥ रामं पद्मविलो
चनं मुनिवरं नाथं शठद्वेषिणं सेनेशं श्रियमिंदिरासहचरं नारायणं संश्रये॥१॥ लक्ष्मीनाथसमारंभां
नाथयामुनमध्यमं॥ अस्मदाचार्यपर्यंतां वंदे गुरुपरंपरां॥२॥ रामानुजदयापात्रं ज्ञानवैराग्यभूषणं॥
श्रीमद्वेंकटनाथार्यं वंदे वेदांतदेशिकं॥३॥ श्रीमान्वेंकटनाथार्यः कवितार्किककेसरी॥ वेदांताचा
र्यवर्यो मे सन्निधत्तां सदा हृदि॥४॥ यो नित्यमच्युतपदांबुजयुग्मरुक्मव्यामोहतस्तदितरा
णि तृणाय मेने॥ अस्मद्गुरोर्भगवतोस्य दयैकसिंधो रामानुजस्य चरणौ शरणं प्रपद्ये॥५॥
माता पिता युवतयस्तनया विभूतिः सर्वं यदेव नियमेन मदन्वयानां॥ आद्यस्य नः कुल
पतेर्वकुलाभिरामं श्रीमदंघ्रियुगलं प्रणमामि मूर्ध्ना॥६॥ भूतं सरश्च महदाह्वय भट्ट

नाथश्रीमद्भक्तिसारकुलशेखरयोगिवाहान् ॥ भक्तांघ्रिरेणुपरकालयतीन्द्रमिश्रान् श्रीमत्प
रांकुशमुनिं प्रणतोस्मि नित्यं ॥७॥ गुरुमुखमनधीत्य प्राहवेदानशेषान्नरपतिपरिक्लृप्तं शुल्क
मादातुकामः ॥ श्वशुरममरवंद्यं रंगनाथस्य साक्षात् ॥ द्विजकुलतिलकं तं विष्णुचि
त्तं नमामि ॥८॥ विष्णुश्रीपत्तनापतीन् सठरिपुश्रीनाथपद्मेक्षणान् रामं यामुनपूर्णमिश्र
यतिराड्गोविंदभट्टारकान् वेदांताख्यमुनिं कलिप्रमथनं श्रीकृष्णपादान्निधिं श्रीरंगेश्वरं केशवा
र्यकमलावासान् भजे केशवं ॥९॥ केशवार्यकृपापात्रं धीशांतिगुणसेवधिं ॥ श्रीशठारियतीशानं दे मा
शिकेंद्रमहं भजे ॥१०॥ प्रपद्येनिरवद्यानां निवद्यां गुणसंपदां ॥ शरणं भवभीतानां शठकोपमुनीश्वरं
॥११॥ शठारिनारायणसंयमीन्द्रपरांकुशश्रीनिधिवंशठारीपरांकुशश्रीशठकोपयोगिपरांकुशानस्वा
दिगुरून् भजामः ॥१२॥ प्रणम्य नारायणवंशठद्विषत्कृपानिवासाननघान्मुनीश्वरान् ॥ मुनीन्द्रनाराय
णवीरराघवौ वरप्रदश्रीगिरिदेशिकौ भजे ॥१३॥ श्रीमन्नारायणमुनिमुनिंकल्याणराघवं ॥ श्रीशठारि
यतीशानां संश्रये श्रीतवत्सलं ॥१४॥ श्रीमन्नारायणमुनिश्रीशठारिपदाश्रयं ॥ श्रीवीरराघवमुनिं वंदे
वेदांतदेशिकं ॥१५॥ वीरराघववेदांतमुनिवर्यपदाश्रये ॥ श्रीमन्नारायणमुनिं श्रये श्रीनाथदेशिकं ॥१६॥
श्रीमन्नारायणमुनेः पदपद्मसमाश्रयं ॥ श्रीनिवासमुनिं वंदे वेदांतद्वयदेशिकं ॥१७॥ श्रीनिवासमुनिं प्रेक्ष

त० समुद्भवं ॥३०॥ गौरवपुषं शरदेंदुवक्त्रं लसदूर्ध्वपुंड्रं मधुरवाक्यमुखीजं ॥ हृदयकारुण्यपूर्णम
२ दगुणनिधिं श्रेष्ठाचार्यपूर्णं तोस्मि नित्यं ॥ ३१॥
ततो यामुनमुनींद्रः संजातो भगवत्प्रियः सिंहासनांशजः श्रीमान्निखिलार्थस्य वेदवित् १ तस्य
पंचाभवन् छिष्या यामुनस्य महात्मनः ॥ कुमुदाक्षांशसंभूतो महापूर्णश्च तत्ववित् २ श्री
शैलपूर्णश्च महान् सुमुखांशो हरिप्रियः ॥ शंकुकर्णांशसंभूतः कांचीपूर्णश्च संयमी ३ गो
ष्ठीपूर्णश्च विख्यातः पुंडरीकांशसंभवः ॥ श्रीमालाधरनामा च वामनस्यांशजो महान् ॥४॥
एते सर्वे महात्मनः सर्वज्ञाः तत्वकोविदाः ॥ महापूर्णस्य सततं गुरुमेवानुवर्त्तयन् ॥५॥
२ श्रीमते रामानुजाय नमः विष्णुश्रीपृतनापतीन् शठरिपु श्रीनाथपद्मेक्षणान् ॥ रा
मं यामुनपूर्णमिश्रयतिराड् गोविंद भट्टार्कान् वेदांताख्यमुनिं कलिप्रमथनं श्री
कृष्णपादाभिधं श्रीरंगेश्वरं केशवार्यकमलावासान् भजे केशवं १ श्रवणोदितयन
क्षेत्रकृतावतरणं विभुं विष्णुमादिगुरुं लक्ष्मीमंत्ररत्नपदं भजे २ तुलागते दिनकरेप्र
वेशाढसमुद्भवं पद्मापादाब्जभ्रांतसेनाधिपमहं भजे ३ वृषभे तु विशाखायां कु
रुकापुरिकाद्विजं सेनेशपादप्रवणं श्रीपरांकुशमाश्रये ४ मासे तपस्यानुराधाजातं राम
नाथमुनिं भजे यः श्रीशठारेः श्रुतवान् प्रबंधमखिलं गुरोः ५ नाथयोगिपादांभोजे २

लब्धवेदांतसंपदं॥ श्रीवीरराघवमुनिं कल्याणगुणधामाश्रये॥१९ वेदांतोत्तरवीरराघवमुनिनारायणं
निधिं श्रीमद्वीररघूद्वहव्ययमीनां कारुण्यनीरास्पदं॥ विज्ञातोभयवेदमौलिहृदयं विद्वद्धिरोभूषणं
वंदे यानुदिनं परांकुशमुनिं वैराग्यरत्नान्वितं॥२०॥ विद्यां नो दिशतु परांकुशार्यमुनिराडंघ्रिद्वयसंश्रि
तं त्रैयंतार्थतत्त्वविधिं तनुमतां त्राणाय जातोदयं॥ स्तोत्राणां व्याप्तसमस्ततत्त्वकुशलं व्याख्यातृसंमासिनं
श्रीनारायणयोगिवर्यमुनिराट्कारुण्यपूर्णं भजे॥२०॥ वीरराघववेदांतनारायणपदाश्रयं॥ श्रीवीरराघ
से वमुनिश्रेयैः श्रितवत्सलं॥२१॥ श्रीवीरराघवमुनिश्रुतिमौलिसूरि श्रीमत्पदांबुजसमाश्रयलब्ध
सत्त्वं श्रीवीरराघवमुनींद्रकृपावलंबं श्रीमत्परांकुशयतींद्रमुनिं प्रपद्यामः॥२२॥ श्रीनिवासवीर
राघववर्यपरांकुशादिरामानुजार्यमुनिभिर्गुरुसार्वभौमैः संप्रेक्षितं करुणया परिपूर्णबोधं श्रीश्रीनिव
सयतिशेखरमाश्रयामः॥२३ श्रीजामातृकारपादाब्जभ्रमरीकृतलोचनं परांकुशगुरुं वंदे वेदांतद्व
यदेशिकं॥२४॥ परांकुशगुरोः पुत्रं ज्ञानवैराग्यभूषणं॥ वेंकटार्यगुरुं वंदे त्रय्यंतद्वयदेशिकं॥२५॥ श्री
शठारियतिश्रीमत्पदपंकजसंश्रयं॥ श्रीगार्ग्यगोत्रसंभूतं वेंकटार्यगुरुं भजे॥२६॥ वेंकटार्यगुरोस्सूनुं धी
ज्ञानादिगुणार्णवं॥ तिरुमलार्यमहं वंदे वेदांतद्वयदेशिकं॥२७॥ श्रीशठारिकृपापात्रं तिरुमलार्यगुरोः सुतं॥
कृष्णमार्यगुरुं नौमि गार्ग्यगोत्रांबुवारिधिं॥२८॥ वीरराघवपादांबुजसत्यस्तात्मभरं गुरुं॥ कृष्णमार्यगु
रोः पुत्रं नृसिंहार्यगुरुं भजे॥२९॥ नृसिंहार्यगुरोः पुत्रं [illegible] शेषाचार्यमहं वंदे गार्ग्यजान

तन० गुरुं वंदे द्राविडाम्नायदेशिकं १९ श्रीरंगार्यगुरोः सूनुं धीरं रामादिगुणं
३ णिं केशवार्यगुरुं वंदे द्राविडाम्नायदेशिकं २० श्रीमते रामानुजाय नमः तुला सं०
श्रवण नीलनवः भूतयोगि जन्म १ तुला सं० धनेष्ठाः सरयोगि जन्म २ तुला सं० सतभिषाः म
हद योगि जन्म ३ वृश्चिक सं० कृत्तिका परकाल जन्म ४ वृश्चिक सं० रोहिणी योगिवाहन
जन्म ५ धने सं० ज्येष्ठा भक्तांघ्रिरेणु जन्म ६ मकर सं० मघा भक्तिसार जन्म ७ कुंभ सं०
पुनर्वसु कुलसेखर जन्म ८ मिथुन सं० स्वाति वुष्णुचित जन्म ९ मेष सं० चित्रा मधु
रकवि जन्म १० मेष सं० आर्द्रा यतिराज जन्म ११ वृषभ सं० विसाखा पराङ्कुश जन्म १२
3 सिंह सं० अनुराधा श्रीनाथमुनि जन्म १३ कर्कट सं० पूर्वफाल्गुनी यामुनाथ जन्म १४
कन्या सं० श्रवण वेदांताचार्य जन्म १५

राम

तत्वप्रवणमाश्रये कुंभेमासिसमुद्भूतं पद्माक्षमहं भजे ६ पुंडरीकाक्षपदांबुजस
माश्रयेण शालिनं चिदचिदीश्वरज्ञेयः राममिश्रमुपास्महे ७ श्रीराममिश्रच
रणसरोजप्रयमाश्रये: शुचौमासोत्तराषाढजातंयामुनदेशिकं ८ तस्यपचा
नेवृद्धिख्यायामुनस्यमहात्मनः कुमुदाक्षांशसंभूतो महापूर्णस्तत्ववित् ९ श्री
शैलपूर्णश्चमहान् समुत्वांशोहरिप्रियः शंकुकर्णांशसंभूतः कांचीपूर्ण
श्चसंयमी १० गोष्ठीपूर्णश्चविज्ञातापुंडरीकांशसंभवः श्रीमालाधरनामा चवामना
4 ंशोराजोमहान् ११ धनुर्ज्येष्ठासमुद्भूतं यामुनांघ्रिसमाश्रितं महापूर्णयतींद्राद्युमे
त्ररत्नप्रदंभजे १२ चैत्रार्द्रासंभवं विष्णुर्दर्शनस्थापनोत्सुकं तुंडीरमंडले शेषमूर्तिरा
मानुजंभजे १३ मकरेहस्तनक्षत्रे सर्वनेत्रांशसंभवं श्रीमत्कुरकुलाधीशं श्रीवत्सां
कमुपास्महे १४ श्रीपराशरभट्टार्य्यः श्रीरंगेशपुरोहितः श्रीवत्सांकःसुतःश्रीमान् श्रे
यसेमेभूयसे १५ कन्याश्रवणसंभूतं घंटांशं वंकटेशंतु श्रीमद्वेंकटनाथार्यंवंदे
वेदांतदेशिकं १६ वेदांतवेद्यामृतवारिरासेर्वेदार्थसारामृतपूरमग्र्यं आदायवर्षंतमहं
प्रपद्ये कारुण्यपूर्णंकलिवैरिदासं १७ श्रीकृष्णपादपादाब्जं नमामि शिरसासदा यत्प्रसा
दप्रभावेनसर्वसिद्धिरभून्मम १८ श्रीकृष्णपादपादाब्जेलोलुपेयस्यहृत्तवे श्रीरंगार्य